नमः पुरस्तादथ पृष्ठतस्ते

नमोऽस्तु ते सर्वत एव सर्व ।

अनन्तवीर्यामितविक्रमस्त्वं

सर्वं समाप्नोषि ततोऽसि सर्वः ॥ ११.४० ॥

namaḥ purastādatha pṛṣṭhataste
namo'stu te sarvata eva sarva ।
anantavīryāmitavikramastvaṁ
sarvaṁ samāpnoṣi tato'si sarvaḥ || 11.40||

सखेति मत्वा प्रसभं यदुक्तं

हे कृष्ण हे यादव हे सखेति ।

अजानता महिमानं तवेदं

मया प्रमादात्प्रणयेन वाऽपि ॥ ११.४१ ॥

sakheti matvā prasabhaṁ yaduktaṁ
he kṛṣṇa he yādava he sakheti ।
ajānatā mahimānaṁ tavedaṁ
mayā pramādātpraṇayena vā'pi || 11.41||

यच्चावहासार्थमसत्कृतोऽसि

विहारशय्यासनभोजनेषु ।

एकोऽथवाप्यच्युत तत्समक्षं

तत्क्षामये त्वामहमप्रमेयम् ॥ ११.४२ ॥

yaccāvahāsārthamasatkṛto'si
vihāraśayyāsanabhojaneṣu ।
eko'thavāpyacyuta tatsamakśaṁ
tatkśāmaye tvāmahamaprameyam || 11.42||

पितासि लोकस्य चराचरस्य

त्वमस्य पूज्यश्च गुरुर्गरीयान् ।

न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यो

लोकत्रयेऽप्यप्रतिमप्रभाव ॥ ११.४३ ॥

pitāsi lokasya carācarasya
tvamasya pūjyaśca gururgarīyān ।
na tvatsamo'styabhyadhikaḥ kuto'nyo
lokatraye'pyapratimaprabhāva || 11.43||

तस्मात्प्रणम्य प्रणिधाय कायं

प्रसादये त्वामहमीशमीड्यम् ।

पितेव पुत्रस्य सखेव सख्युः

प्रियः प्रियायार्हसि देव सोढुम् ॥ ११.४४ ॥

tasmātpraṇamya praṇidhāya kāyaṁ
prasādaye tvāmahamīśamīḍyam ।
piteva putrasya sakheva sakhyuḥ
priyaḥ priyāyārhasi deva soḍhum || 11.44||